वार्घमगस्त्यनाम् ॥ सलिलममरपादपयोऽर्च्चितं यद्वन-परिवेष्टितमूर्त्तिभिर्भुजङ्गैः । फणिजनितविषाग्निसम्प्रदुष्टं भवति शिवं तदगस्त्यदर्शनेन ॥ स्मरणादपि पापमपाकुरुते किमुत ? स्तुतिभिर्वरुणाङ्गरुहः । मुनिभिः कथितोऽस्य यथार्घविधिः कथयामि तथैव नरेन्द्रहितम् ॥ संख्याविधानात् प्रतिदेशमस्य विज्ञाय सन्दर्शनमादिशेज्ज्ञः । तच्चोज्जयिन्यामगतस्य कन्यां भागैः स्वराख्यैः स्फुटभास्करस्य ॥ ईषत्प्रभिन्नेऽरुणरश्मिजालैर्नैशेऽन्धकारे दिशि दक्षिणस्याम् । सांवत्सरावेदितदिग्विभागे भूपोऽर्घमुर्व्यां प्रयतः प्रयच्छेत्" ॥ इत्युक्तान्ते उपसंहृतं यथा "दृश्यते स किल हस्तगतेऽर्कें रोहिणीमुपगतेऽस्तमुपेतीति" ।

**अगस्त्यसंहिता** स्त्री अगस्त्यनिर्मिता संहिता । रामचन्द्रविष्णुवामनादिपूजेतिकर्त्तव्यताबोधके शास्त्रभेदे ।

**अगस्त्योदय** पु० अगस्त्यस्य नक्षत्ररूपेण दक्षिणस्थस्य उदयः । अगस्त्यनक्षत्रोदये तस्य च नक्षत्रस्य दक्षिणस्थितत्वेन उत्तरदिग्वासिनां सर्वदा दर्शनयोग्यता नास्ति, तस्योदयश्च भाद्रशेषे भवति "यस्तु भाद्रपदे मासि उदिते कलसोद्भवे इति" पुराणम् । तद्विवरणम् अगस्त्यचारशब्दे दर्शितम् ॥ तस्योदये जलादीनां प्रसन्नत्वं "प्रससादोदयादम्भः कुम्भयोनेर्महौजसः इति" रघावुक्तम् ।

**अगाध** त्रि० गाध–प्रतिष्ठायाम् घञ्–न०ब० । अतिगभीरे । छिद्रे न० । गाधः निम्नसीमा स नास्ति यस्येति । नीचसीमारहिते "साम्यगाधे भये मग्नेति" पुरा० दुर्बोधे च । "अगाधस्थानघागुणा" इत्यमरः । [ह्रदे ।

**अगाधजल** पु० अगाधं जलमत्र । अतिगभीरजले

**अगार** न० अगम् न गच्छन्तमृच्छति प्राप्नोति अग+ऋ–अण् । गृहे । "तत्रागारं धनपतिगृहानिति मेघ० ।

**अगिर** पु० न गीर्य्यते दुःखेन गॄ–बा० क न०त० । स्वर्गे ।

**अगिरौकस्** पु० अगिरः स्वर्ग ओकोवासस्थानं यस्य । देवे ।

**अगु** पु० न गौः किरणोऽस्य । राहुग्रहे सूर्य्यालोकाभावे तमसि । गोशून्ये त्रि० ।

**अगुण** पु० न०त० । गुणविरोधिनि दोषे । "तद्वः सर्वं प्रवक्ष्यामि प्रसङ्गे च गुणागुणमिति" स्मृतिः न०ब० । गुणरहिते त्रि० "भक्तिप्रीतिप्रणयसहितं मानदम्भाद्यपेतं चेतोऽस्माकं गुणवदगुणं गोदुहां देहमेतत्" इत्युद्धवदूतः ।

**अगुरु** न० न गुरुर्यस्मात् । स्वनामप्रसिद्धे, अगुरुचन्दने "धूपैस्त्वागुरुगन्धिभिरिति" शिंशपा वृक्षे (शिशु) च । गुरुभिन्ने, उपदेशकशून्ये त्रि० । गुरुवर्णभिन्ने लघुवर्णे पु० "अगुरुचतुष्कं भवति गुरू द्वौ घनकुचयुग्मे, शशिवदनासाविति" श्रुतबोधः । गौरवरहिते गौरवविपरीतलाघववति त्रि० ।

**अगुरुशिंशपा** स्त्री अगुरुःसारो यस्याः तादृशी शिंशपा मध्यपदलोपित० । (शिशु) इति प्रसिद्धे शिंशपावृक्षे ।

**अगूढ़गन्ध** न० न गूढ़ो गन्धो यस्य ६ब० । हिङ्गुद्रव्ये । तन्निर्यासस्योत्कटगन्धत्वात्तथा । अगुप्तसौरभे द्रव्यमात्रे त्रि० ।

**अगृभीत** त्रि० न गृहीतम् छान्दसत्वात् हस्य भः । अगृहीते, "जयजय जह्यजामगृभीतगुणामिति, भाग०स्क० ।

**अगौकस्** पु० अगः पर्वत ओकः स्थानं यस्य । शरभे पशौ पर्वतवासिनि त्रि० ।

**अग्नामरुत्** पु० द्वि० द्व० आनङ् । एकहविरुद्देश्ययोस्तन्नाम्नोर्देवयोः । तौ देवते अस्य अण् । आग्निमारुतं हविः । [देवयोः ।

**अग्नाविष्णु** पु० द्वि०द्व० आनङ् । एकहविर्भोक्त्रोस्तन्नामकयो

**अग्नायी** स्त्री अग्नि+ऐङ्–ङीष् । अग्नेर्योषिति स्वाहाख्यायाम् । "वरुणानी नचाग्नायी तस्याः सिमन्तिनी समेवि" भट्टिः । सा च दक्षकन्या तस्यास्याग्निप्रियताकथा महाभारते "दक्षस्याहं प्रिया कन्या स्वाहा नाम महाभुज ! ॥ बाल्यात् प्रभृति नित्यञ्च जातकामा हुताशने स न मे कामनां पुत्र ! सम्यग् जानाति पावकः । इच्छामि शाश्वतं वासं वस्तुं पुत्र ! सहाग्निना । स्कन्द उवाच । हव्यं कव्यञ्च यत् किञ्चिद्द्विजा० नामाथ संस्कृतम् । होष्यन्त्यग्नौ सदा देवि ! स्वाहेत्युक्त्वा समुद्धृतम् । अद्य प्रभृति दास्यन्ति सुवृत्ताः सत्पथे स्थिताः । एवमग्निस्त्वया सार्द्धं सदा वत्स्यति शोभने" ! वन० मार्क० प० ।

**अग्नि** पु० अङ्गति ऊर्द्धं गच्छति अगि–नि नलोपः । अग्नौ स्वनामप्रसिद्धे तेजोभेदे, तेजसि आकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी, इति" श्रुतिः । तत्र तेजःपदार्थस्तावद्द्विविधः सूक्ष्मः स्थूलश्च । सूक्ष्मवायुसंभूतः सूक्ष्मवायुसंभूतः सूक्ष्मः पञ्चीकृतस्तु स्थूलः "तासां त्रिवृतं त्रिवृतमेकैकां करोतीति" श्रुतौ त्रिवृत्करणस्य पञ्चीकरणस्याप्युपलक्षणत्वम् । पञ्चीकरणप्रकारश्च पञ्चीकरणशब्दे वक्ष्यते । तथा च भूतान्तराष्टमभागमिश्रितेन स्वस्वार्द्धभागेन उत्पन्नः पञ्चीकृतः । तस्य च पञ्चात्मकत्वेऽपि "वैशेष्यात्तद्वाद इति" शारीरकोक्तेः भूयस्त्वात् तैजसत्वव्यवहारः । सोऽयं स्थूलो वह्निः प्रकारान्तरेण त्रिविधः भौमः